सूर्यमंडल स्तोत्रं

सूर्यमंडल स्तोत्रं

नमोऽस्तु सूर्याय सहस्ररश्मये
सहस्रशाखान्वितसंभवात्मने |
सहस्रयोगोद्भवभावभागिने
सहस्रसंख्यायुगधारिणे नमः || 1 ||

यन्मंडलं दीप्तिकरं विशालं
रत्नप्रभं तीव्रमनादिरूपं |
दारिद्र्यदुःखक्षयकारणं च
पुनातु मां तत्सवितुर्वरेण्यं || 2 ||

यन्मंडलं देवगणैः सुपूजितं
विप्रैः स्तुतं भावनमुक्तिकोविदं |
तं देवदेवं प्रणमामि सूर्यं
पुनातु मां तत्सवितुर्वरेण्यं || 3 ||

यन्मंडलं ज्ञानघनं त्वगम्यं
त्रैलोक्यपूज्यं त्रिगुणात्मरूपं |
समस्ततेजोमयदिव्यरूपं
पुनातु मां तत्सवितुर्वरेण्यं || 4 ||

यन्मंडलं गूढमतिप्रबोधं
धर्मस्य वृद्धिं कुरुते जनानां |
यत्सर्वपापक्षयकारणं च
पुनातु मां तत्सवितुर्वरेण्यं || 5 ||

यन्मंडलं व्याधिविनाशदक्षं
यदृग्यजुः सामसु संप्रगीतं |
प्रकाशितं येन च भूर्भुवः स्वः
पुनातु मां तत्सवितुर्वरेण्यं || 6 ||

यन्मंडलं वेदविदो वदंति
गायंति यच्चारणसिद्धसंघाः |
यद्योगिनो योगजुषां च संघाः
पुनातु मां तत्सवितुर्वरेण्यं || 7 ||

यन्मंडलं सर्वजनैश्च पूजितं
ज्योतिश्च कुर्यादिह मर्त्यलोके |
यत्कालकालाद्यमनादिरूपं
पुनातु मां तत्सवितुर्वरेण्यं || 8 ||

यन्मंडलं विष्णुचतुर्मुखाख्यं
यदक्षरं पापहरं जनानां |
यत्कालकल्पक्षयकारणं च
पुनातु मां तत्सवितुर्वरेण्यं || 9 ||

यन्मंडलं विश्वसृजं प्रसिद्ध-
-मुत्पत्तिरक्षाप्रळयप्रगल्भं |
यस्मिन् जगत्संहरतेऽखिलं च
पुनातु मां तत्सवितुर्वरेण्यं || 10 ||

यन्मंडलं सर्वगतस्य विष्णो-
-रात्मा परं धाम विशुद्धतत्त्वं |
सूक्ष्मांतरैर्योगपथानुगम्यं
पुनातु मां तत्सवितुर्वरेण्यं || 11 ||

यन्मंडलं वेदविदोपगीतं
यद्योगिनां योगपथानुगम्यं |
तत्सर्ववेद्यं प्रणमामि सूर्यं
पुनातु मां तत्सवितुर्वरेण्यं || 12 ||

सूर्यमंडलसु स्तोत्रं यः पठेत्सततं नरः |
सर्वपापविशुद्धात्मा सूर्यलोके महीयते || 13 ||

इति श्रीभविष्योत्तरपुराणे श्रीकृष्णार्जुनसंवादे श्री सूर्य मंडल स्तोत्रं |